# शुद्धिकौमुदी

पाठः २१ - २८.१०.२०१७

समासः सङ्ख्या च

© All the content in these slides is the intellectual property of Vyoma Linguistic Labs Foundation.
Replication/reuse in any form without express written permission from the organisation is prohibited.

# समासः

- इदं महदाश्चर्यम् ।

’महदाश्चर्यम्’......../’महाश्चर्यम्’...........

- देवशर्मराज्ञः शासनम् अत्युत्तमम् आसीत् ।

’देवशर्मराजस्य’...........


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# समासः

| अशुद्धम् | शुद्धम् |
| --- | --- |
| सामन्तराजानः | सामन्तराजाः |
| मोगलराजानः | मोगलराजाः |
| अस्मद्राज्ञः | अस्मद्राजस्य |
| अवन्तिराजानम् | अवन्तिराजम् |
| स्वराज्ञः | स्वराजस्य |
| रघुनामकराजानम् | रघुनामकराजम् |

# समासः

* वत्स ! पाणिपादान् प्रक्षाल्य भोजनार्थम् आगच्छ ।

'पाणिपादम्'............

* पितापुत्रौ नगरं गच्छतः ।

# समासः

- कार्यक्रमे संस्कृतज्ञाः आसन् । तदितराः अपि आसन् ।

’तदितरे’...............

- एतत् सविवरं ज्ञातुम् इच्छामि अहम् ।

’सविवरणम्’............/’विस्तरेण’...............

# समासः

- कार्यकर्तृभिः लघुलघुकार्येषु अपि अवधानं दातव्यम् ।

’लघुषु अपि कार्येषु’............

- तस्य कृषिकस्य गोविन्दः इति नामकः पुत्रः आसीत् ।

’गोविन्दनामकः’...............


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# समासः

- बालिका प्राप्तलेखनी सती सन्तुष्टा जाता ।

---

’प्राप्तलेखनीका’..................

- बहुवधूकं गृहम् ।
- बहुकर्तृकं कार्यम् ।
- देवमातृकः देशः ।
- धृतघटीका ।

# समासः

- क्रीतमालकः सः गृहं गतवान् ।

---

’क्रीतमालकः / क्रीतमालाकः / क्रीतमालः’ ………………

- अधीतविद्यः / अधीतविद्यकः / अधीतविद्याकः
- बहुशाखः / बहुशाखकः / बहुशाखाकः
- श्रितशय्यः / श्रितशय्यकः / श्रितशय्याकः
- पोषितलतः / पोषितलतकः / पोषितलताकः

# समासः

- सर्वे कार्यकर्तारः सोत्साहेन कार्यं कृतवन्तः ।

---

’सोत्साहम्’...............

- दशमकक्ष्योत्तीर्णः सः उद्योगान्वेषणं करोति ।

’दशमकक्ष्याम् उत्तीर्णः सः’...................

- दशमकक्ष्यायाः उत्तीर्णानन्तरं सः अन्यत्र गतः ।

’उत्तरणानन्तरम्’...................../’...कक्ष्याम् उत्तीर्य’.................


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# समासः

- उदारचेतः सः दीनानां साहाय्यं करोति ।

---

’उदारचेताः’................/’उदारचेतस्कः’............

- बहुदिनारभ्य एतत् एवमेव प्रचलति ।

’बहुभ्यः दिनेभ्यः आरभ्य’.............

- पतिपत्नी नगरम् आगच्छताम् ।

’पतिपत्न्यौ’........../ ’पतिः पत्नी च’.............

# समासः

- पतिपत्न्यौ गृहं प्रत्यागतवन्तौ ।

'प्रत्यागतवत्यौ'.............

- अहं व्याख्यातारूपेण कार्यं करोमि ।

'व्याख्यातृरूपेण'..............

# समासः

- महामना मालवीयस्य कार्यम् असाधारणम् ।

’महामनसः’............/’महामनोमालवीयस्य’................

- रमेशः मध्येमार्गं/मार्गमध्ये मिलितः ।
- वत्स ! अलं त्वरया । उदरपूर्णं भोजनं कुरु ।

’पूर्णोदरम्’............

# समासः

- अत्र उपस्थितस्य प्रत्येकस्यापि जनस्य परिच्चयः मम नास्ति ।

’एकैकस्य’...............

- पूर्वं प्रत्येकस्मिन् गृहे जनाः संस्कृतं जानन्ति स्म ।

# समासः

- अहं निरपराधी अस्मि ।

'निरपराधः'...............

- एषः अनपराधी/अनपराधः अस्ति ।

# समासः

- सालङ्कृता कन्या योग्याय वराय दातव्या ।

’अलङ्कृता.....’ / ’सालङ्कारा’............

- राजा सालङ्कृते रथे उपविश्य प्रस्थितवान् ।

’अलङ्कृते रथे’..............


vyoma ॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

# समासः

- एषु दिनेषु उपभोक्तावादः अभिवर्धते ।

’उपभोक्तृवादः’...............

- भवन्तः सर्वे सकुशलिनः खलु ?

’सकुशलाः’............/’कुशलिनः’.................

- आधुनिके काले सुगन्धद्रव्याणि प्राप्यन्ते बहुधा ।

’सुगन्धिद्रव्याणि’....................

# सङ्ख्या

- षष्ठकक्ष्यायां विंशतयः जनाः सन्ति ।

’विंशतिः जनाः’.................

- स्पर्धायां विंशतिजनैः भागः गृह्यते ।

- शतं जनेभ्यः भोजनं व्यवस्थापनीयम् अस्ति ।

’शताय जनेभ्यः’............./’शतजनेभ्यः’...............

# सङ्ख्या

- भवतः कोषे कति रूप्यकाणि सन्ति ?

’पञ्च सन्ति’...........

- अहं पञ्चदिनात् पत्रस्य प्रतीक्षां कुर्वन् अस्मि ।

’पञ्चभ्यः दिनेभ्यः’................../’पञ्चदिनेभ्यः’.............


vyoma ॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

# सङ्ख्या

- अष्टादशतमे पाठे अयम् अंशः चर्चितः अस्ति ।

’अष्टादशे’.............

- भोः षष्ठम ! त्वम् उत्तिष्ठ ।

’षष्ठ’...........

# सङ्ख्या

---

- चतुर्थायां पङ्क्तौ कश्चन मुद्रणदोषः अस्ति ।

’चतुर्थ्याम्’.............

- कारागारे स्थापितः चोरः विंशतितमायां रात्रौ पलायितवान् ।

’विंशतितम्याम्’..............


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# सङ्ख्या

---

- विंशतितमे एतस्मिन् शताब्दे सर्वे अर्थपराः एव दृश्यन्ते प्रायेण ।

'एतस्यां शताब्द्यां'............... / 'एतस्मिन् शतके'..........

- विद्यालयस्य शततमं वर्षम् एतत् । अतः, शताब्दीकार्यक्रमः महता वैभवेन आचरणीयः ।

'शताब्दकार्यक्रमः'...............

# सङ्ख्या

- एतस्मिन् शतमाने बहवः कवयः अभूवन् ।

’एतस्मिन् शतके’.........../’एतस्यां शताब्द्यां’..................

- पितृपादानां षष्ट्यब्दिकार्यक्रमे बहवः उपस्थिताः आसन् ।

’षष्ट्यब्दकार्यक्रमे’.............


॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

# सङ्ख्या

- मम गृहे पञ्चषड् यानानि सन्ति ।

'पञ्चषाणि'...................

- त्रिचतुर्वारं सः माम् आहूतवान् ।

'त्रिचतुरवारम्'................

# सङ्ख्या

- अद्य कार्यक्रमे उपविंशतिः जनाः आसन् ।

’उपविंशाः’.................

- जीवने परश्शतं समस्याः सम्मुखीकरणीयाः भवन्ति ।

’परश्शताः’..............


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# सङ्ख्या

- अद्य कार्यक्रमः कतिवादने ?

'कदा'......../'कस्मिन् समये'.................

- सः मह्यम् एकशतं रूप्यकाणि दत्तवान् ।

'शतं रूप्यकाणि'.....................


vyoma ॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

# सङ्ख्या

---

- चतसृणाम् अपि बालिकानाम् अध्ययनं सम्यक् प्रचलति ।

’चतसृणाम्’........................

- सार्धैकसहस्रवर्षात् पूर्वम् एषा घटना प्रवृत्ता ।

’सार्धैकसहस्रात् वर्षेभ्यः’................/’सार्धैकसहस्रवर्षेभ्यः’..............

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

For downloading course-materials, login @
www.sanskritfromhome.in

Subscribe to our youtube channel @
vyoma-samskrta-pathasala

Buy our Samskrita-learning products @
www.digitalsanskritguru.com

Support our cause for Samskrita-Samskriti @
www.vyomalabs.in

vyoma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.
All materials shared in our website are purely for the purpose of personal study.
Replication/reuse in any form without written permission from the organisation is prohibited.